९

346sk09

स्त्रीप्रत्ययः - चाप् टाप् डाप् प्रत्ययाः

प्रस्तावना

तत्र त्रिषु लिङ्गेषु मध्ये पुंस्त्वबोधनाय नपुंसकत्वबोधनाय च प्रत्ययान्तरम् अपेक्षितं नास्ति। प्रातिपदिकेनैव तेषां प्रतीतिः भवति। किन्तु स्त्रीत्वबोधनाय केचन् प्रत्ययाः कल्पिताः सन्ति। ते च

टाप्-डाप्-चापस्त्रयोप्येते ङीप्-ङीष्-ङीन्-प्रत्ययैः सह।

ऊङ्-तिभ्यां मिलिताश्चापि सन्त्यष्टौ प्रत्ययाः स्त्रियाम्।।

एवञ्च टाप् डाप् चाप् ङीप् ङीष् ङीन् ऊङ् ति इत्येते अष्टौ प्रत्ययाः स्त्रीत्वस्य द्योतनाय प्रातिपदिकात् भवन्ति। तत्र कस्माद् प्रातिपदिकात् टाप् भवति कस्मात् वा डाप् भवति इति बोधयितुं प्रकृतं प्रकरणं प्रवर्तते। अत्र च पाठे टाप् डाप् चाप् ङीन् ति इत्येते पञ्च प्रत्ययाः कस्मात् प्रातपदिकात् भवन्ति इति प्रतिपाद्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- टाप् डाप् चाप् ङीन् ति इति एतान् पञ्च स्त्रीप्रत्ययान् ज्ञातुं शक्नुयात्।
- टाप् डाप् चाप् ङीन् ति इति एतान् पञ्च स्त्रीप्रत्ययान् प्रयोक्तुं प्रभवेत्।
- एतेषां प्रत्ययानां संयोजनेन शब्देषु किं किं परिवर्तनं भवति इति ज्ञातुं शक्नुयात्।।
- एतेषां प्रत्ययानां संयोजनं कृत्वा स्त्रीलिङ्गशब्दानां निर्माणं कर्तुं शक्नुयात्।
- पठनपाठनकाले तत्र तत्र शब्देषु एतेषु कः स्त्रीप्रत्ययः अस्ति इति सुस्पष्टं ज्ञातुं प्रभवेत्।

[९.१] अजाद्यतष्टाप्॥ (४.१.४)

सूत्रार्थः - स्त्रीत्वे द्योत्ये अजादिगणपठितशब्दान्तात् प्रातिपदिकात् परः टाप् प्रत्ययः भवति। एवं स्त्रीत्वे द्योत्ये ह्रस्वाकारान्तात् प्रातिपदिकात् परः टाप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं टाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। अजाद्यतः इति पञ्चम्येकवचनान्तं पदम्। टाप् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अस्मिन् सूत्रे अजाद्यतः इति पदे बहुव्रीहिगर्भसमाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - अजः आदिः येषां ते अजादयः।

अजादयश्च अत् च इत्यनयोः समाहारः अजाद्यत्, तस्मात् अजाद्यतः। एवञ्च अस्य अर्थः भवति - अजादेः अतः च। तत्र अजादेः इत्यस्य अजादिगणपठितशब्दात् इत्यर्थः। अतः इत्यस्य ह्रस्वाकारात् इत्यर्थः। तत्र अजादेः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण अजादेः इत्यत्र तदन्तविधिः भवति। एवञ्च अजादेः इत्यस्यार्थो भवति अजादिगणपठितशब्दान्तात् इति। एवम् अतः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च अतः इत्यत्रापि येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अतः इत्यस्यार्थो भवति ह्रस्वाकारान्तात् इति। एवञ्च सूत्रार्थो भवति अजादिगणपठितशब्दान्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये टाप् प्रत्ययः परः भवति। एवं ह्रस्वाकारान्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये टाप् प्रत्ययः परः भवति।

उदाहरणम् - अजा। खट्वा।

सूत्रार्थसमन्वयः -

अजा। तत्र अजादिगणे अज इति प्रातिपदिकं पठितम् अस्ति। पुनः व्यपदेशिवद्भावेन अजान्तमपि अस्ति। एवञ्च अजादिगणपठितशब्दान्तं प्रातिपदिकम्, अज इति प्रातिपदिकम्। तस्मात् स्त्रीत्वद्योतनाय अजाद्यतष्टाप् इति सूत्रेण टाप् प्रत्ययः भवति। तेन च अज टाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण प्रत्ययाद्यस्य टापः टकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। पुनः टापः पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। ततश्च अज आ इति स्थितिः भवति। ततः परम् अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते सति अजा इति रूपं सिद्ध्यति। ततश्च स्वादिप्रत्यययोगेन प्रथमैकवचने अजा इति सुबन्तं पदं सिध्यति। अन्येषां रूपाणां सिद्धिप्रक्रिया अजन्तस्त्रीलिङ्गप्रकरणे रमाशब्दवत् वर्तते।

खट्वा। अत्र खट्व इति प्रातिपदिकम् अस्ति। अस्य च अन्त्यवर्णः ह्रस्वाकारः अस्ति। तेन इदं प्रातिपदिकं ह्रस्वाकारान्तम् अस्ति। ततश्च ह्रस्वाकारान्तात् खट्व इति प्रातिपदिकात् स्त्रीत्वद्योतनाय अजाद्यतष्टाप् इति सूत्रेण टाप् प्रत्ययः भवति। तेन च खट्व टाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण टापः टकारस्य इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। पुनः टापः पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति तस्य लोपः इति सूत्रेण च तस्य लोपः भवति। ततश्च खट्व आ इति स्थितिः भवति। ततः परम् अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे कृते सति खट्वा इति रूपं सिद्ध्यति।

अत्राजादिगणपठितशब्दानामन्यान्युदाहरणानि - अजा एडका अश्वा चटका मूषिका बाला वत्सा होडा पाका मन्दा विलाता क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा मध्यमा कोकिला दंष्ट्रा इति।

अत्रादन्तप्रातिपदिकानामन्यान्युदाहरणानि - खट्वा रमा माला मेधा गङ्गा यमुना शाला सर्वा धनिका कृत्रिमा स्वभावजा गता माया विद्या अविद्या इति।

[१.२] डाबुभाभ्यामन्यतरस्याम्॥ (४.१.१३)

सूत्रार्थः - मन्नन्तात् प्रातिपदिकात् अन्नन्तात् बहुव्रीहिसंज्ञकात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये वा डाप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं डाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। डाप् इति प्रथमैकवचनान्तं पदम्। उभाभ्याम् इति पञ्चमीद्विवचनान्तं पदम्। अन्यतरस्याम् इति अव्ययपदम्। अत्र मनः इति सूत्रात् मनः (५/१) इति अनुवर्तते। अनो बहुव्रीहेः इति सम्पूर्णमपि सूत्रम् अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र मनः इति अनः इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। अतः येन विधिस्तदन्तस्य इति सूत्रेण मनः इत्यत्र अनः इत्यत्र च तदन्तविधिः भवति। तेन मनः इत्यस्य मन्नन्तात् इत्यर्थो भवति। अनः इत्यस्य च अन्नन्तात् इत्यर्थो भवति। बहुव्रीहेः इत्यपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। एवञ्च सूत्रार्थो भवति - मन्नन्तात् प्रातिपदिकात्, अन्नन्तात् बहुव्रीहिसंज्ञकात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये वा डाप् प्रत्ययः परः भवति।

उदाहरणम् - दामा। बहुयज्वा।

सूत्रार्थसमन्वयः -

दामा। अत्र दामन् इति प्रातिपदिकम्। एतच्च मन्नन्तम् अस्ति। अतः मन्नन्तात् दामन् इति प्रातिपदिकात् स्त्रीत्वद्योतनाय डाबुभाभ्यामन्यतरस्याम् इति सूत्रेण विकल्पेन डाप् प्रत्ययः भवति। तेन च दामन् डाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण डकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन दामन् आ इति स्थितिः जायते। ततः परं टेः इति सूत्रेण दामन् इति शब्दस्य टेः अन् इत्यस्य लोपे सति दाम् आ इति स्थितिः जायते। वर्णसम्मेलने च सति दामा इति रूपं सिध्यति। डाप् इत्यस्य अभावे तु दामन् इत्येव रूपं तिष्ठति। एवमेव दामा पामा सीमा अतिमहिमा इत्यादावपि बोध्यम्।

बहुयज्वा। अत्र बहुयज्वन् इति प्रातिपदिकम्। एतच्च अन्नन्तम् अस्ति। पुनः अत्र बहुव्रीहिसमासः अपि अस्ति। अतः इदं बहुव्रीहिसंज्ञकमपि अस्ति। एवञ्च अन्नन्तात् बहुव्रीहिसंज्ञकात् बहुयज्वन् इति प्रातिपदिकात् स्त्रीत्वद्योतनाय डाबुभाभ्यामन्यतरस्याम् इति सूत्रेण विकल्पेन डाप् प्रत्ययः भवति। तेन च बहुयज्वन् डाप् इति स्थितिः भवति। ततः परं चुटू इति सूत्रेण डकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण च पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन बहुयज्वन् आ इति स्थितिः जायते। ततः परं टेः इति सूत्रेण बहुयज्वन् इति शब्दस्य टेः अन् इत्यस्य लोपे सति बहुयज्व् आ इति स्थितिः जायते। वर्णसम्मेलने च सति बहुयज्वा इति रूपं सिध्यति। डाप् इत्यस्य अभावे तु बहुयज्वन् इत्येव रूपं तिष्ठति। एवमेव सुचर्मा सुपर्वा बहुराजा इत्यादावपि बोध्यम्।

[९.३] यङश्चाप्॥ (४.१.७४)

सूत्रार्थः - ञ्यङन्तात् प्रातिपदिकात्, ष्यङन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये चाप् प्रत्ययः परः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं चाप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। यङः इति पञ्चम्येकवचनान्तं पदम्। चाप् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम्। अत्र सूत्रे

स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र यङः इत्यनेन ञ्यङः ष्यङः च ग्रहणम् अस्ति। ञ्यङः ष्यङः च प्रत्ययौ इति कृत्वा अत्र प्रत्ययग्रहणे तदन्ता ग्राह्याः इति नियमेन तदन्तविधिः भवति। तेन यङः इति पदस्य ञ्यङन्तात् ष्यङन्तात् च इत्यर्थः भवति। पुनः ञ्यङन्तात् ष्यङन्तात् इति अनयोः च प्रातिपदिकात् इत्यत्र अन्वयः भवति। एवञ्च सूत्रार्थो भवति - ञ्यङन्तात् प्रातिपदिकात्, ष्यङन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये चाप् प्रत्ययः परः भवति।

उदाहरणम् - आम्बष्ठ्या। कारीषगन्ध्या।

सूत्रार्थसमन्वयः -

आम्बष्ठ्या। अत्र आम्बष्ठ्य इति शब्दः ञ्यङन्तः अस्ति। यतोहि अम्बष्ठशब्दात् अम्बष्ठस्य अपत्यं स्त्री इत्यर्थे वृद्धेत्कोसलाजादाञ्ञ्यङ् इति सूत्रेण ञ्यङ् इति प्रत्यये अम्बष्ठ ञ्यङ् इति जाते ञकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे च सति अम्बष्ठ य इति स्थितिः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण आदिवृद्धौ यस्येति च इति सूत्रेण अम्बष्ठशब्दस्य अन्त्यस्य अकारस्य लोपे च सति आम्बष्ठ् य इति रूपं भवति। ततः वर्णसम्मेलनं कृत्वा आम्बष्ठ्य इति रूपं जायते। एवञ्च आम्बष्ठ्य इति प्रातिपदिकं ञ्यङन्तमस्ति इति सुस्पष्टमेव। तेन च स्त्रीत्वविवक्षायां ञ्यङन्तात् आम्बष्ठ्य इति प्रातिपदिकात् यङश्चाप् इति सूत्रेण चाप् प्रत्यये सति आम्बष्ठ्य चाप् इति स्थितिः भवति। ततः चापः चकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति आम्बष्ठ्य आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे च सति आम्बष्ठ्या इति रूपं सिध्यति। अम्बष्ठनामकस्य जनस्य पुत्री इति तदर्थः।

कारीषगन्ध्या। अत्र कारीषगन्ध्य इति शब्दः ष्यङन्तः अस्ति। यतोहि करीषगन्धिशब्दात् करीषगन्धेः गोत्रापत्यं स्त्री इत्यर्थे अण्-प्रत्यये सति करीषगन्धि अण् इति स्थितौ अणः स्थाने अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे इति सूत्रेण ष्यङ् इत्यादेशे सति करीषगन्धि ष्यङ् इति जाते षकारस्य षः प्रत्ययस्य इति सूत्रेण इत्संज्ञायाम्, ङकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे च सति करीषगन्धि य इति स्थितिः भवति। ततः तद्धितेष्वचामादेः इति सूत्रेण आदिवृद्धौ यस्येति च इति सूत्रेण करीषगन्धिशब्दस्य इकारस्य लोपे च सति कारीषगन्ध् य इति रूपं भवति। ततः वर्णसम्मेलनं कृत्वा कारीषगन्ध्य इति रूपं जायते। एवञ्च कारीषगन्ध्य इति प्रातिपदिकं ष्यङन्तमस्ति इति सुस्पष्टमेव। तेन च स्त्रीत्वविवक्षायां ष्यङन्तात् कारीषगन्ध्य इति प्रातिपदिकात् यङश्चाप् इति सूत्रेण चाप् प्रत्यये सति कारीषगन्ध्य चाप् इति स्थितिः भवति। ततः चापः चकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति कारीषगन्ध्य आ इति स्थितिः भवति। ततः अकः सवर्णे दीर्घः इति सूत्रेण दीर्घे च सति कारीषगन्ध्या इति रूपं सिध्यति। कारीषगन्धिः इति कस्यचित् जनस्य नाम। तस्य गोत्रापत्यं स्त्री कारीषगन्ध्या इति।

[९.४] यूनस्तिः॥ (४.१.७७)

सूत्रार्थः - युवन् इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये ति प्रत्ययो भवति। स च तद्धितः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं तिप्रत्ययं विदधाति। सूत्रेऽस्मिन् यूनः इति पञ्चम्येकवचनान्तं पदम्। ति इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः तद्धिताः (१/३) इति अधिकारः च अत्र आगच्छति। अत्र ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अत्र यूनः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। एवञ्च सूत्रार्थो भवति - युवन् इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये ति प्रत्ययः परः भवति स च तद्धितः भवति।

उदाहरणम् - युवतिः।

सूत्रार्थसमन्वयः -

युवति। अत्र युवन् इति नान्तं प्रातिपदिकम् अस्ति। एवञ्च स्त्रित्वविवक्षायां युवन् इति प्रातिपदिकात् यूनस्ति इति सूत्रेण ति प्रत्ययः भवति। तेन युवन् ति इति स्थितिः भवति। ततः परं नलोपः प्रातिपदिकस्य इति सूत्रेण युवन् इति शब्दस्य नकारस्य लोपः भवति। तेन च युवति इति जायते। ततः तद्धितान्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां स्वादिकार्ये च कृते युवतिः इति रूपं सिध्यति। तरुणी इति तदर्थः।

[९.५] शार्ङ्गरवाद्यञो ङीन्॥ (४.१.७३)

सूत्रार्थः - जातिवाचकात् अनुपसर्जनात् शार्ङ्गरवादिगणपठितात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति। जातिवाचकात् अनुपसर्जनात् अञन्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीन्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। शार्ङ्गरवाद्यञः इति पञ्चम्येकवचनान्तं पदम्। ङीन् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदमनुवर्तते। जातेरस्त्रीविषयादयोपधात् इति सूत्रात् जातेः (५/१) इति पदमनुवर्तते। अनुपसर्जनात् (५/१) इति अधिकारः अत्र आगच्छति। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। शार्ङ्गरवाद्यञः इति पदं समस्तम् अस्ति। अत्र च बहुव्रीहिगर्भसमाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - शार्ङ्गरवः आदिः येषां ते शार्ङ्गरवादयः। शार्ङ्गरवादयश्च अञ् च इति शार्ङ्गरवाद्यञ्, तस्मात् शार्ङ्गरवाद्यञः। एवञ्च अस्यार्थो भवति - शार्ङ्गरवादेः अञः च इति। शार्ङ्गरवादेः इत्यस्य च शार्ङ्गरवादिगणपठितात् इत्यर्थः। अत्र जातेः इति पदम् अनुपसर्जनात् इति पदं च शार्ङ्गरवादेः इत्यस्य विशेषणं भवति। पुनः शार्ङ्गरवादेः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। अञः इति प्रत्ययग्रहणम् अस्ति। तेन प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया तत्र तदन्तविधिः भवति। तेन अञः इत्यस्य अञन्तात् इत्यर्थः भवति। पुनः अञन्तात् इत्यस्य जातेः

इति पदम् अनुपसर्जनात् इति पदं च विशेषणं भवति। तेन जातिवाचकात् अनुपसर्जनात् अञन्तात् इत्यर्थो लभ्यते। अञन्तात् इति प्रातिपदिकात् इत्यस्य विशेषणम् अस्ति। अतः इति पदमपि प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन येन विधिस्तदन्तस्य इति परिभाषया अत्र तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। एवञ्च सूत्रार्थो भवति - जातिवाचकात् अनुपसर्जनात् शार्ङ्गरवादिगणपठितात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति। जातिवाचकात् अनुपसर्जनात् अञन्तात् अदन्तात् प्रातिपदिकात् च स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति।

उदाहरणम् - शार्ङ्गरवी। बैदी।

सूत्रार्थसमन्वयः -

शार्ङ्गरवी। अत्र शार्ङ्गरव इति शब्दः शार्ङ्गरवादिगणे पठितः अस्ति। पुनः जातिवाचकः अस्ति। अनुपसर्जनः अस्ति, अदन्तश्च अस्ति। अतः स्त्रीत्वविवक्षायां शार्ङ्गरवाद्यञो ङीन् इति सूत्रेण ङीन् प्रत्ययः भवति। तेन शार्ङ्गरव ङीन् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन शार्ङ्गरव ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते शार्ङ्गरवी इति रूपं सिध्यति। अस्य रूपप्रक्रिया च अजन्तस्त्रीलिङ्गप्रकरणे गौरीशब्दवद् बोध्या।

बैदी। अत्र बैद इति शब्दः अस्ति। अयं शब्दः अञन्तः अस्ति। पुनः जातिवाचकः अस्ति। अनुपसर्जनः अस्ति, अदन्तश्च अस्ति। अतः स्त्रीत्वविवक्षायां शार्ङ्गरवाद्यञो ङीन् इति सूत्रेण ङीन् प्रत्ययः भवति। तेन बैद ङीन् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीषः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण षकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन बैद ई इति स्थितिः भवति। यचि भम् इति सूत्रेण भसंज्ञा भवति। ततः यस्येति च इति सूत्रेण अकारलोपे कृते वर्णसम्मेलने च कृते बैदी इति रूपं सिध्यति। अस्य रूपप्रक्रिया च अजन्तस्त्रीलिङ्गप्रकरणे गौरीशब्दवद् बोध्या।

[१.६] प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः॥ (७.३.४४)

सूत्रार्थः - प्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने इत् भवति आपि परे। किन्तु सुप्परके आपि परे अतः स्थाने इद् न भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रम् इत् इति आदेशं विदधाति। सूत्रेऽस्मिन् सप्त पदानि सन्ति। प्रत्ययस्थात् इति पञ्चम्यन्तं पदम्। कात् इति पञ्चम्यन्तं पदम्। पूर्वस्य इति षष्ठ्यन्तं पदम्। अतः इति षष्ठ्यन्तं पदम्। इद् इति प्रथमान्तं पदम्। आपि इति सप्तम्यन्तं पदम्। असुपः इति पञ्चम्यन्तं पदम्। असुपः इति पदं समस्तम् अस्ति। अत्र नञ्तत्पुरुषसमासः अस्ति। अस्य च विग्रहः भवति न सुप् इति असुप्, तस्मात् असुपः। प्रत्ययस्थात् इति पदं कात् इत्यस्य विशेषणं भवति। कात् इति पदं पूर्वस्य

इत्यस्य विशेषणं भवति। पूर्वस्य इति पदम् अतः इत्यस्य विशेषणं भवति। एवञ्च अस्य सूत्रस्यार्थः भवति प्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने इत् भवति आपि परे। किन्तु सुप्परके आपि परे अतः स्थाने इद् न भवति। इत् इत्यत्र तकारः उच्चारणार्थः न तु श्रवणार्थः।

उदाहरणम् - कारिका बालिका इत्यादीनि उदाहरणानि सन्ति।

सूत्रार्थसमन्वयः -

कारिका। अत्र कृ धातोः ण्वुल्तृचौ इति सूत्रेण ण्वुल्प्रत्यये कृते कृ ण्वुल् इति जाते ततः परं चुटू इति सूत्रेण णकारस्य इत्संज्ञायाम्, लकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायां च सत्यां तस्य लोपः इति सूत्रेण उभयोः लोपे कृ वु इति जायते। ततश्च युवोरनाकौ इति सूत्रेण वोः स्थाने अक इति आदेशे कृ अक इति जाते अचो ञ्णिति इति सूत्रेण ऋकारस्य स्थाने वृद्धिं कृत्वा कार् अक इति जाते वर्णसम्मेलने च सति कारक इति शब्दः सिध्यति। ततः कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञायां जातायाम्, कारक इत्यस्य अदन्तप्रातिपदिकत्वात् अजाद्यतष्टाप् इति सूत्रेण टाप्-प्रत्यये टापः टकारस्य चुटू इति सूत्रेण इत्संज्ञायाम्, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण उभयोः लोपे सति कारक आ इति स्थितिः भवति। तदा अत्र टापि परे अकरूपप्रत्ययस्थात् कात् पूर्वस्य अतः स्थाने प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रेण इत् इत्यादेशे कारिक आ इति स्थितिः भवति। तत्पश्चात् अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घे सति कारिका इति रूपं सिध्यति।

अन्यानि उदाहरणानि - बालिका अश्वपालिका अध्यापिका तारिका हारिका धारिका परिव्राजिका शयिका नायिका गायिका पाचिका पाठिका इत्यादीनि।

पाठगतप्रश्नाः

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. कति लिङ्गानि भवन्ति। कानि च तानि।

२. कति स्त्रीप्रत्ययाः सन्ति।

३. अजाद्यतष्टाप् इति सूत्रेण किं विधीयते।

४. यूनस्ति इति सूत्रेण किं विधीयते।

५. दामा इत्यत्र कः स्त्रीप्रत्ययः अस्ति।

६. यङश्चाप् इति सूत्रेण किं विधीयते।

७. अजादिपदे कः समासः कश्च विग्रहः।

८. पुंस्त्वस्य शास्त्रीयं लक्षणं किम्।

९. स्त्रीत्वस्य शास्त्रीयं लक्षणं किम्।

१०. नपुंसकत्वस्य शास्त्रीयं लक्षणं किम्।

११. सिद्धान्ते लिङ्गं किन्निष्ठम्।

पाठसारः

अत्र पाठे टाप् डाप् चाप् ङीन् ति इति पञ्चानां स्त्रीप्रत्ययानां वर्णनं वर्तते। अत्र सर्वप्रथमं टाप्प्रत्ययविधायकस्य अजाद्यतष्टाप् इति सूत्रस्य व्याख्यानम् अस्ति। तदुदाहरणानि च दत्तानि सन्ति। पुनः डाप्प्रत्ययविधायकस्य डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य व्याख्यानम् उदाहरणं च वर्तते। ततः परं चाप्प्रत्ययविधायकस्य यङश्चाप् इति सूत्रस्य व्याख्यानं तदुदाहरणं च अस्ति। एवं तिप्रत्ययविधायकस्य यूनस्तिः इति सूत्रस्य व्याख्या वर्तते। पुनः ङीन्प्रत्ययविधायकस्य शार्ङ्गरवाद्यञो ङीन् इति सूत्रस्य व्याख्या कृता तदुदाहरणानि च साधितानि। प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रस्य व्याख्यानं तदुदाहरणानां च सिद्धिः दर्शिता इति।

पाठान्तप्रश्नाः

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. अजाद्यतष्टाप् इति सूत्रस्य सोदाहरणं व्याख्यां लिखन्तु।

२. डाबुभाभ्यामन्यतरस्याम् इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

३. यङश्चाप् इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।

४. यूनस्ति इति सूत्रस्य सोदाहरणं व्याख्यां लिखत।

५. शार्ङ्गरवाद्यञो ङीन् इति सूत्रस्य सोदाहरणं व्याख्यां कुर्वन्तु।

६. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रस्य व्याख्या लेख्या।

७. कारिका इति प्रयोगस्य सिद्धिप्रक्रियां लिखन्तु।

८. शार्ङ्गरवी इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

९. कारीषगन्ध्या इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

१०. बहुयज्वा इति प्रयोगस्य सिद्धिप्रक्रियां प्रदर्श्यन्तु।

पाठगतप्रश्नोत्तराणि

१. त्रीणि लिङ्गानि भवन्ति। स्त्रीत्वम्, पुंस्त्वम् नपुंसकत्वम् च इति।

२. अष्टौ स्त्रीप्रत्ययाः सन्ति।

३. अजाद्यतष्टाप् इति सूत्रेण टाप्प्रत्ययः विधीयते।

४. यूनस्ति इति सूत्रेण तिप्रत्ययः विधीयते।

५. दामा इत्यत्र डाप्प्रत्ययः अस्ति।

६. यङश्चाप् इति सूत्रेण चाप्प्रत्ययः विधीयते।

७. अजादिपदे बहुव्रीहिसमासः अस्ति। अस्य च अजः आदिः येषां ते अजादयः इति विग्रहः।

८. सत्त्वरजस्तमसां प्राकृतगुणानाम् उपचयः पुंस्त्वम्।

९. सत्त्वरजस्तमसां प्राकृतगुणानाम् अपचयः स्त्रीत्वम्।

१०. सत्त्वरजस्तमसां प्राकृतगुणानां स्थितिमात्रं नपुंसकत्वम्।

११. पदार्थनिष्ठम्।

॥इति नवमः पाठः॥